Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 25

No. of Printed Pages – 07

SS–12–Sanskrit Sah.(Supp.)

# उच्च माध्यमिक पूरक परीक्षा, 2017
# SENIOR SECONDARY SUPPLEMENTARY EXAMINATION, 2017
## संस्कृत साहित्यम्

समय : 3¼ (सपाद होरात्रयम्)

पूर्णाङ्क : 80

**परीक्षार्थिभ्यः सामान्य निर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांक अनिवार्यतः लेख्यः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव देयम् ।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए



Downloaded from www.cclchapter.com

## खण्ड – क

**1)** अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

महाराणा प्रताप: चित्तौडमण्डलस्य नृपस्य उदयसिंहस्य पुत्र: – आसीत् । बाल्यकालादेव अयं निर्भीक: दयालुश्च आसीत् । अयं महावीर: देशस्य स्वतन्त्रतायै सर्वाणि सुखानि अत्यजत् । महाराणा–प्रताप: भारतस्य स्वतन्त्रतायै महान्तं प्रयत्नमकरोत् । अयं वीर: यदा राज्यसिंहासनम् आरोहत्, तदानीमेव इमां प्रतिज्ञाम् अकरोत्–यावद् अस्माकं देश: स्वतन्त्रो न भविष्यति तावद् अहं सुखपूर्वकं न शयिष्ये । मम भूमौ शयनम् एव भविष्यति न तु स्वर्णपर्यङ्के।

i) बाल्यकालादेव निर्भीक: दयालुश्च क: आसीत्? (एक पदेन उत्तरम्) **[1]**

ii) महाराणा प्रताप: कां प्रतिज्ञाम् अकरोत्? **[1]**

iii) अस्माकं ........... स्वतन्त्रो न भविष्यति । इत्यत्र ''भविष्यति'' इति क्रियाया: कर्तृपदं किम्? **[1]**

**2)** निम्नलिखितम् अपठितं गद्यांशं पठित्वा निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत –

विवाहे सं जाते कन्या: गृहस्थाश्रमं प्रविशन्ति । यदि पुरूषो विद्वान् स्त्री च विद्याशून्या भवति तर्हि तयो: दाम्पत्यजीवनं सुखकरं न भवति । विद्याया: अभावात् स्त्री स्वकीयं कर्तव्यं न जानाति, अत एव बहवो रोगा: व्याधयश्च तत्र स्थानं कुर्वन्ति । अत: स्त्रीणामपि शिक्षा पुत्राणां शिक्षावदेव आवश्यकी वर्तते । स्त्रियो मातृशक्ते: प्रतीकभूता: सन्ति, अत: तासां सदा सम्मान: करणीय: । यस्मिन् देशे समाजे च स्त्रीणामादरो भवति, स:देश: समाजश्चोन्नतिं प्राप्नुत: । उक्तं च महर्षिमनुना ''यत्र नार्यस्तु पूज्यन्ते, रमन्ते तत्र देवता:'' ।

i) कस्या: अभावात् स्त्री स्वकीयं कर्तव्यं न जानाति? (एक पदेन उत्तरम्) [½]

ii) मातृशक्ते: प्रतीकभूता: का: सन्ति? (एक पदेन उत्तरम्) [½]

iii) महर्षिमनुना किमुक्तम्? (पूर्ण वाक्येन उत्तरम्) **[2]**

iv) यस्मिन् देशे समाजे च स्त्रीणामादरो भवति इत्यस्मिन् वाक्ये ''भवति'' इति क्रियापदस्य कर्तृपदं किम्? **[1]**

v) अत: तासां सदा सम्मान: करणीय: । अस्मिन् वाक्ये ''तासाम्'' इति सर्वनामपदं कस्य संज्ञापदस्य स्थाने प्रयुक्तम् । **[1]**

vi) ''दु:खकरम्'' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत। **[1]**

vii) बहव: रोगा: तत्र स्थानं कुर्वन्ति । इत्यत्र विशेष्यपदं किम्? **[1]**

viii) गद्यांशस्य समुचितं शीर्षकं लिखत । **[2]**



Downloaded from www.cclchapter.com

## खण्ड – ख

**3)** प्रदत्तरूपरेखया कथासंयोजनं करणीयम् – **[8 × 1 = 8]**

आसीत् कश्चित् ......... नाम व्याघः। पक्षि मृगादीनां ......... स्वीयां जीविकां .......... । एकदा ........ जालं विस्तीर्य ........ आगतवान्। अन्यश्चिन् दिवसे ....... यदा चञ्चलः ....... गतवान् ...... दौर्भाग्याद् एकः व्याघ्रः ....... आसीत्

अथवा

क्रमरहितानि वाक्यानि समुचित क्रमानुसारं विलिखत –

i) एकदा प्रातः शृगालः बकम् अवदत्।

ii) कुटिल–स्वभावः श्रृगालः स्थाल्यां बकाय क्षीरोदनम् अयच्छत्।

iii) अग्रिमे दिने स भोजनाय श्रृगालस्य निवासम् अगच्छत्।

iv) श्रृगालस्य निमन्त्रेण बकः प्रसन्नः अभवत्।

v) तयोः मित्रता आसीत्।

vi) एकस्मिन् वने शृगालः बकश्च निवसतः।

vii) बकम् अवदत् च मित्र! अस्मिन् पात्रे आवाम् अधुना सहै व खादाव :।

viii) मित्र! श्वः त्वं मया सह भोजनं कुरू।

**4)** प्रदत्त संकेतानुसारं वर्णनं लिखत – (80 शब्दाः) **[4]**

परितः, आवृणोति, पर्यावरणम्, मानवजीवनस्य, जीवाः, प्रदूष्यते, ध्वनिप्रदूषणेन, प्रतिवर्षम्, वनस्पतीनाम्, प्रजातयः विषपानम्, सघनवनानि, विविधसंगठने, प्रवर्धमाना संरक्षणम्।

अथवा

सत्संगतिः, सज्जनानाम्, शिष्टजनाः, कुसंगत्या, दुष्टः गुणाः, दोषाः, संभवन्ति, अज्ञानं, विनाशयति, दोषान्, अपहरति, पुंसाम्, प्रतिभाशालिनी, लाभः उपवेशनम्।



Downloaded from www.cclchapter.com

## खण्ड – ग

5) अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

मनुष्याणां हिंसा वृत्तिस्तु निरवधिः । पशुहत्या तु तेषाम् आक्रीडनम् । केवलं विक्लान्तचित्त विनोदाय महारण्यम् उपगम्य ते यथेच्छं निर्दयं च पशुघातं कुर्वन्ति । तेषां पशुप्रहारव्यापारमालोक्य जडानामपि अस्माकं विदीर्यते हृदयम् । निरन्तरम् आत्मोन्नतये चेष्टमानाः लोभाक्रान्त–हृदयाः मनुजन्मानः किल प्रतिक्षणं स्वार्थसाधनाय सर्वात्मना प्रवर्तन्ते । न धर्ममनुधावन्ति, न सत्यमनुबध्नन्ति । परं तृणवद् अपेक्षन्ते स्नेहम् ।

i) पशुहत्या केषाम् आक्रीडनम्? (एक पदेन उत्तरम) [1]

ii) किमालोक्य जडानामपि अस्माकं हृदयं विदीर्यते? (पूर्ण वाक्येन उत्तरम्) [1]

iii) मनुष्याणां हिंसावृत्तिस्तु निरवधिः इत्यस्मिन् वाक्ये विशेषणपदं चित्वा लिखत । [1]

iv) ते यथेच्छं निर्दयं च पशुघातं कुर्वन्ति । इत्यत्र ''कुर्वन्ति'' इति क्रियापदस्य कर्तृपदं किम्? [1]

6) अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

सहसा विदधीत न क्रियाम विवेकः परमापदां पदम् ।

वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः

i) सहसा कां न विदधीत? (एक पदेन उत्तरम्) [1]

ii) आपदां परं पदं कः अस्ति? (पूर्ण वाक्येन उत्तरम्) [1]

iii) गुणलुब्धाः स्वयमेव सम्पदः इत्यत्र विशेष्यपदं लिखत । [1]

iv) वृणते हि विमृश्यकारिणं ...... सम्पदः । इत्यत्र ''वृणते'' इति क्रियापदस्य कर्तृपदं ....... किम्? [1]

7) निम्नलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

अरून्धती :– अतिजवेन दूरमतिक्रान्तः स चपलः कथं दृश्यते? (प्रविश्य)

वटव :– पश्यतु कुमारस्तावदाश्चर्यम् ।

लवः– दृष्टमवगतं च । नूनमाश्वमेधिकोऽयमश्वः ।

वटव :– कथं ज्ञायते?

लवः– ननु मूर्खाः । पठितमेव हि युष्माभिरपि तत्काण्डम् । किं न पश्यथ? प्रत्येकं शतसंख्याः कवचिनो दण्डिनो निपङ्गिणश्च रक्षितारः । यदि च विप्रत्ययस्तत्पृच्छत ।

वटव :– भो भोः! किं प्रयोजनोऽयमश्वः परिवृतः पर्यटति?

i) अतिजवेन दूरमतिक्रान्तः कः? (एकेन पदेन उत्तरम्) [1]

ii) तत्काण्डं कैः पढितमेव? (पूर्ण वाक्येन उत्तरम्) [1]

iii) ''नूनमाश्वमेधिकोऽयमश्वः'' इत्यत्र विशेष्यपदं किम्? [1]

iv) अस्मिन् नाट्यांशे ''अविश्वासस्य'' इति पदस्य पर्यायः कः? [1]



Downloaded from www.cclchapter.com

8) निम्नलिखित शब्दयो: हिन्दीभाषायाम् आङ्लभाषायां वा अर्थो लिखत – [1+1=2]

i) मातरिश्वा

ii) उपदेष्टार:

9) रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरूत – [1+1+1+1=4]

i) दूर स्थितानां मैत्री नश्यति ।

ii) अस्माभि: पर्वता: शंकव: कृता: ।

iii) पत्रस्य अर्धाधिकं भागम् आर्द्रीकरोति ।

iv) शिशोरपि दृप्तां वाचं न सहन्ते ।

10) निम्नांकित वाक्ययो : भावार्थ: हिन्दीभाषायां संस्कृते आङ्लभाषायां वा लेखनीय: [2+2=4]

i) स यत्प्रमाणं कुरूते लोकस्तदनुवर्तते ।

ii) पश्येह मधुकरीणां सञ्चितमर्थं हरन्त्यन्ये ।

11) अधोलिखित श्लोकस्य अन्वयं लिखत – [2]

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।

जोषयेत् सर्व कर्माणि विद्वान्युक्त: समाचरन् ।।

12) निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत –

i) विचक्षण: प्रस्तुतमाचचक्षे

इत्यस्मिन् कर्तृक्रिययो: चयनं कुरूत । [1+1=2]

ii) यो हि यस्य प्रियो जन: । इत्यत्र विशेषणपदं किम्? [1]

iii) मन्त्रिणां मध्येऽपि तस्य सुख्याति: वर्तते ।

इत्यत्र रेखाङ्कितपदस्य स्थाने संज्ञापदस्य प्रयोगं कृत्वा वाक्यं पुन: लिखत । [1]

iv) मम गमनसमय: समुपागत एव । इत्यत्र सर्वनाम पदस्य चयनं कुरूत । [1]

v) प्रतिमासमर्धाधिकं धनं प्रेषयतिस्म । इत्यत्र रेखाङ्कितपदस्य पर्यायबोधकं पदं लिखत । [1]

vi) ‘‘समुद्रेभ्योऽधो भागे तिष्ठन्ति स नरक इति वदन्ति’’ इत्यत्र रेखाङ्कितपदस्य विलोमार्थकपदं लिखत । [1]

vii) ‘‘किं वस्तु विद्वन्! गुर वे प्रदेयम्’’ इत्येतत् वाक्यं क: कस्मै कथयति? [1]



Downloaded from www.cclchapter.com

13) “शिशुपालवधम्” इति महाकाव्यस्य रचयिता कः ? [1]

14) “वासवदत्ता” इति कस्य कवेः कृतिः ? [1]

15) पण्डितेन अम्बिकादत्तव्यासेन रचितः संस्कृतसाहित्यस्य प्रथमः उपन्यासः कः? [1]

16) डॉ. पुष्करदत्तशर्मणा विरचिता बहुचर्चिता का कथा? [1]

17) “कुर्वन्ने–वेह कर्माणि जिजीविषेच्छतं समाः” इति कथनं केषां ग्रन्थानां संदेशः? [2]

18) कविता रचना कार्य हे तोः कः मीरापुरस्कारेण पुरस्कृतः? [1]

19) राजस्थान विश्वविद्यालयतः संस्कृत विषये सर्व प्रथमं “डी–लिट्” इत्युपाधिना कः विद्वान् विभूषितः? [1]

20) i) छन्दःसु कतिः गणाः सन्ति?

ii) प्रतिचरणं पञ्चदशवर्णाः कस्मिन् छन्दसि भवति?

[2]

21) निम्नलिखितेषु कयोश्चिद् द्वयोः लक्षणोदाहरणे लिखत – [1½+1½=3]

i) वसन्त तिलका

ii) शिखरिणी

iii) मन्दाक्रान्ता



Downloaded from www.cclchapter.com

22) निम्नाङ्कितपंक्तिषु छन्दसः नामोल्लेखं कुरूत – [1+1+1=3]

i) मम हि पितृभिरस्य प्रस्तुतो ज्ञातिभेदः ।

ii) स्वभाव एवैष परोपकारिणाम् ।

iii) हंसो यथा राजत पञ्जरस्थः

23) शब्दस्य अनेकार्थकथने कोऽलंकारः भवति? तस्य परिभाषा लेखनीया । [2]

24) अधोलिखितयोः कयोश्चिद् द्वयोः अलंकारयोः लक्षणोदाहरणे लिखत – [1½+1½=3]

i) अन्योक्तिः

ii) उत्प्रेक्षा

iii) अर्थान्तरन्यासः

25) अधोलिखितेषु पंक्तिषु अलंकारस्य नामोल्लेखं कुरुत –

i) वहन्ति वर्षन्ति नदन्ति भान्ति । [1]

ii) रमते न मरालस्य मानसं मानसं विना । [1]

iii) अनलंकृत शरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम् । [1]



Downloaded from www.cclchapter.com

DO NOT WRITE ANYTHING HERE

Downloaded from www.cclchapter.com